**संस्कृतवार्ता:**

**दिनाङ्क :-23.11.2024**

**प्रात: - 06:55**

**विधानसभानिर्वाचनम्**

**झारखण्ड-महाराष्ट्रराज्ययो: विधानसभा-निर्वाचनै: सह विभिन्न- राज्यानाम् अष्टचत्वारिंशत्-विधानसभासनानां केरलस्य वायनाड-संसदीयक्षेत्रस्य महाराष्ट्रस्य नांदेड-संसदीयक्षेत्रस्य च उपनिर्वाचनस्य कृते मतगणनायै सर्वा: सज्जता: सम्पूरिता:। मतगणना अद्य प्रात: अष्टवादने आरप्स्यते। अपि च मध्याह्ने एव परिणामा: अपेक्षिता: वर्तन्ते। सर्वप्रथमं प्रैष्य-मतपत्राणां गणना भविष्यति। मतगणना-प्रक्रियाया: सुचारू-सञ्चालनाय निर्वाचनायोगेन व्यापकव्यवस्था कृता। झारखण्डराज्ये अस्मिन् मासे त्रयोदश-विंशतिदिनांकयो: द्वयो: चरणयो: एकाशीति-विधानसभासनेभ्य: मतदानं जातम्।**

**प्रधानमन्त्री-शिखरसम्मेलनम्**

**प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् विगतेषु दशवर्षेषु तस्य प्रशासनेन क्रियामाणानां रिफॉर्म-परफॉर्म-ट्रांसफार्म इत्येतेषां मन्त्राणां कारणात् विश्वं साम्प्रतं भारतस्य रणनीतिक-महत्वं स्वीकरोति इति। प्रधानमन्त्री जर्मनी देशस्य स्टटगार्टइत्यत्र मीडिया-हाउस-इत्यमुना आयोजितम् एकं कार्यक्रमम् आभासीय-माध्यमेन सम्बोधितवान्।**

**राष्ट्रपतिः द्रौपदीमुर्मुः**

**राष्ट्रपतिः द्रौपदीमुर्मुः विकसितराष्ट्रं निर्मातुं राष्ट्रं-प्रथमम् इत्येतस्य दृष्टिकोणस्य स्वीकरणस्य आवश्यकतायाः उपरि अवधानं दत्तवती।**

हैदराबाद-नगरे लोक-मन्थनस्य चतुर्थं संस्करणं सम्बोधयन्ती राष्ट्रपतिः सबलं प्रतिपदितवती यत् सर्वै: नागरिकै: देशस्य सांस्कृतिकीं बौद्धिकीं च परम्परां अवगन्तुम् अस्माकम् अमूल्यपरम्पराणां सुदृढीकरणं च करणीयम् इति।

**अमितशाह:**

गृहमन्त्रिणा अमितशाहेन निगदितं यत् अपराधस्य विरुद्धं प्रशासनस्य "शून्य-सहिष्णुताया: नीतिः अस्ति, तथा च दिल्ल्या: विधि-व्यवस्थायाः स्थितौ कस्यापि प्रकारस्य शैथिल्यम् न स्वीक्रियते इति। गृहमन्त्री ह्य: दिल्ली-आरक्षकैः सह मेलनं कृत्वा विधि-व्यवस्थायाः स्थितिं समीक्षितवान्। केन्द्रीयगृहसचिवः गोविन्दमोहनः, गुप्तचरविभागस्य निर्देशकः तपन डेका: दिल्ली-आरक्षि-आयुक्तः, अन्ये च वरिष्ठाः अधिकारिणः अस्याम् सभायां उपस्थिताः आसन् ।

**केन्द्रियमाध्यमिक-शिक्षाबोर्डइति**

केन्द्रिय-माध्यमिक-शिक्षा-बोर्ड-इत्यनेन सिंगल-गर्ल-चाइल्ड-स्कॉलरशिप-इत्यस्यै योजनायै अन्तर्जालीय-माध्ययेन आवेदनानि आमन्त्रितानि। चतुर्विंशत्यधिक-द्विसहस्रतमे वर्षे एतस्मात् मण्डलात् दशमकक्षां उत्तीर्णा: छात्रा: अनया योजना लाभान्विता: भविष्यन्ति। आवेदनाय अन्तिमं दिनं दिसम्बरमासस्य त्रयोविंशतिदिनाङ्को वर्तते। सर्वा: सूचना: अन्तर्जाल-पटले तत्र उपलब्धा: सन्ति।

**प्रधानमन्त्री-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी नाइजीरिया-ब्राजील-गयाना-देशानां यात्रावधौ अनेकै: विश्व-नेतृभिस्साकम् अनेकानि द्विपक्षीयोपवेशनानि विहितवान्। अत्रावधौ प्रधानमन्त्री एकत्रिंशत्-द्विपक्षीयोपवेशनेषु भागम् अभजत्। अपि च वैश्विकनेतृभिस्सह अनौपचारिकीं वार्तामपि कृतवान्। श्रीमोदी नाइजीरियादेशे एकं ब्राजीलदेशे दश गयानायां च नव द्विपक्षीयोपवेशनानि समनुष्ठितवान्।

प्रधानमन्त्री इण्डोनेशियाया: राष्ट्रपतिना प्रबोवो-सुबियान्टो इत्यनेन पुर्तगालस्य प्रधानमन्त्रिणा लुइस-मोंटेनेग्रो इत्यमुना ब्रिटेनदेशीयेन प्रधानमन्त्रिणा कीर-स्टार्मर इत्यनेन चिलीदेशीयेन राष्ट्रपतिना ग्रेबियल-बोरिक इत्यमुना अर्जेन्टीना-देशस्य राष्ट्रपतिना जेवियर-माइली इत्येतेन च सह अनेकानि उपवेशनानि कृतवान्।

रक्षामन्त्री

रक्षामन्त्री राजनाथसिंह: लाओस-देशस्य राजधान्यां वियनतियाने नगरे जापानदेशस्य रक्षामन्त्रिणा जनरल-निकातानि इत्येतेन सह मेलनं कृतवान्। एकस्मिन् सामाजिकसन्देशपटले श्रीसिंह: अवोचत् यत् जनरल-निकातानी इत्यमुना सह तस्य चर्चा समुचितासीत् ।

क्रिकेट्

क्रिकेट-प्रतिस्पर्धायाम्, ऑस्ट्रेयिादलेन पर्थस्थले बॉर्डर-गावस्कर-ट्रॉफी प्रतियोगिताया: प्रथमायां निकषस्पर्धायां भारतं विरुध्य प्रथमे पर्याये सप्तक्रीडकानां हानि: पुरस्सरं सप्तषष्टि: धावनाङ्का: निर्मिता:।

।।इति वार्ता:।।